# Shiva Sahasranama Stotram

# શ્રીશિવસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : shivasahasranAma stotra from Mahabharat

File name : shivasahasMaha.itx

Category : sahasranAma, shiva, stotra, vyAsa

Location : doc_shiva

Author : Vyas

Proofread by : Kirk Wortman kirkwort at hotmail.com, NA

Description-comments : with pUrva and uttarapIThikA from Anushasanaparva.

Source : mahAbhArata 13 anushAsanaparva adhyAya 48

Latest update : November 1, 2010, September 24, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 15, 2025

*sanskritdocuments.org*

# શ્રીશિવસહસ્રનામસ્તોત્રમ્

મહાભારતાન્તર્ગતમ્

તતઃ સ પ્રયતો ભૂત્વા મમ તાત યુધિષ્ઠિર ।
પ્રાઞ્જલિઃ પ્રાહ વિપ્રર્ષિર્નામસઙ્ગ્રહમાદિતઃ ॥ ૧॥

ઉપમન્યુરુવાચ
બ્રહ્મપ્રોક્તૈરૃષિપ્રોક્તૈર્વેદવેદાઙ્ગસમ્ભવૈઃ ।
સર્વલોકેષુ વિખ્યાતં સ્તુત્યં સ્તોષ્યામિ નામભિઃ ॥ ૨॥

મહદ્ભિર્વિહિતૈઃ સત્યૈઃ સિદ્ધૈઃ સર્વાર્થસાધકૈઃ ।
ઋષિણા તણ્ડિના ભક્ત્યા કૃતૈર્વેદકૃતાત્મના ॥ ૩॥

યથોક્તૈઃ સાધુભિઃ ખ્યાતૈર્મુનિભિસ્તત્ત્વદર્શિભિઃ ।
પ્રવરં પ્રથમં સ્વર્ગ્યં સર્વભૂતહિતં શુભમ્ ॥ ૪॥

શ્રુતૈઃ સર્વત્ર જગતિ બ્રહ્મલોકાવતારિતૈઃ ।
સત્યૈસ્તત્પરમં બ્રહ્મ બ્રહ્મપ્રોક્તં સનાતનમ્ ।
વક્ષ્યે યદુકુલશ્રેષ્ઠ શ‍ૃણુષ્વાવહિતો મમ ॥ ૫॥

વરયૈનં ભવં દેવં ભક્તસ્ત્વં પરમેશ્વરમ્ ।
તેન તે શ્રાવયિષ્યામિ યત્તદ્બ્રહ્મ સનાતનમ્ ॥ ૬॥

ન શક્યં વિસ્તરાત્કૃત્સ્નં વક્તું સર્વસ્ય કેનચિત્ ।
યુક્તેનાપિ વિભૂતીનામપિ વર્ષશતૈરપિ ॥ ૭॥

યસ્યાદિર્મધ્યમન્તં ચ સુરૈરપિ ન ગમ્યતે ।
કસ્તસ્ય શક્નુયાદ્વક્તું ગુણાન્કાર્ત્સ્ન્યેન માધવ ॥ ૮॥

કિન્તુ દેવસ્ય મહતઃ સઙ્ક્ષિપ્તાર્થપદાક્ષરમ્ ।
શક્તિતશ્ચરિતં વક્ષ્યે પ્રસાદાત્તસ્ય ધીમતઃ ॥ ૯॥

અપ્રાપ્ય તુ તતોઽનુજ્ઞાં ન શક્યઃ સ્તોતુમીશ્વરઃ ।

યદા તેનાભ્યનુજ્ઞાતઃ સ્તુતો વૈ સ તદા મયા ॥ ૧૦॥

અનાદિનિધનસ્યાહં જગદ્યોનેર્મહાત્મનઃ ।
નામ્નાં કચ્ચિત્સમુદ્દેશં વક્ષ્યામ્યવ્યક્તયોનિનઃ ॥ ૧૧॥

વરદસ્ય વરેણ્યસ્ય વિશ્વરૂપસ્ય ધીમતઃ ।
શ્ૃણુ નામ્નાં ચયં કૃષ્ણ યદુક્તં પદ્મયોનિના ॥ ૧૨॥

દશ નામસહસ્રાણિ યાન્યાહ પ્રપિતામહઃ ।
તાનિ નિર્મથ્ય મનસા દધ્નો ઘૃતમિવોદ્ધૃતમ્ ॥ ૧૩॥

ગિરેઃ સારં યથા હેમ પુષ્પસારં યથા મધુ ।
ઘૃતાત્સારં યથા મણ્ડસ્તથૈતત્સારમુદ્ધૃતમ્। ૧૪॥

સર્વપાપાપહમિદં ચતુર્વેદસમન્વિતમ્ ।
પ્રયત્નેનાધિગન્તવ્યં ધાર્યં ચ પ્રયતાત્મના ॥ ૧૫॥

માઙ્ગલ્યં પૌષ્ટિકં ચૈવ રક્ષોઘ્નં પાવનં મહત્ ॥ ૧૬॥

ઇદં ભક્તાય દાતવ્યં શ્રદ્દધાનાસ્તિકાય ચ ।
નાશ્રદ્દધાનરૂપાય નાસ્તિકાયાજિતાત્મને ॥ ૧૭॥

યશ્ચાભ્યસૂયતે દેવં કારણાત્માનમીશ્વરમ્ ।
સ કૃષ્ણ નરકં યાતિ સહપૂર્વૈઃ સહાત્મજૈઃ ॥ ૧૮॥

ઇદં ધ્યાનમિદં યોગમિદં ધ્યેયમનુત્તમમ્ ।
ઇદં જપ્યમિદં જ્ઞાનં રહસ્યમિદમુત્તમમ્ ॥ ૧૯॥

યં જ્ઞાત્વા અન્તકાલેઽપિ ગચ્છેત પરમાં ગતિમ્ ।
પવિત્રં મઙ્ગલં મેધ્યં કલ્યાણમિદમુત્તમમ્ ॥ ૨૦॥

ઇદં બ્રહ્મા પુરા કૃત્વા સર્વલોકપિતામહઃ ।
સર્વસ્તવાનાં રાજત્વે દિવ્યાનાં સમકલ્પયત્ ॥ ૨૧॥

તદા પ્રભૃતિ ચૈવાયમીશ્વરસ્ય મહાત્મનઃ ।
સ્તવરાજ ઇતિ ખ્યાતો જગત્યમરપૂજિતઃ ॥ ૨૨॥

બ્રહ્મલોકાદયં સ્વર્ગે સ્તવરાજોઽવતારિતઃ ।
યતસ્તણ્ડિઃ પુરા પ્રાપ તેન તણ્ડિકૃતોઽભવત્ ॥ ૨૩॥

સ્વર્ગાચ્ચૈવાત્ર ભૂર્લોકં તણ્ડિના હ્યવતારિતઃ ।

સર્વમઙ્ગલમાઙ્ગલ્યં સર્વપાપપ્રણાશનમ્ ॥ ૨૪॥

નિગદિષ્યે મહાબાહો સ્તવાનામુત્તમં સ્તવમ્ ।
બ્રહ્મણામપિ યદ્બ્રહ્મ પરાણામપિ યત્પરમ્ ॥ ૨૫॥

તેજસામપિ યત્તેજસ્તપસામપિ યત્તપઃ ।
શાન્તીનામપિ યા શાન્તિર્દ્યુતીનામપિ યા દ્યુતિઃ ॥ ૨૬॥

દાન્તાનામપિ યો દાન્તો ધીમતામપિ યા ચ ધીઃ ।
દેવાનામપિ યો દેવો ઋષીણામપિ યસ્ત્વૃષિઃ ॥ ૨૭॥

યજ્ઞાનામપિ યો યજ્ઞઃ શિવાનામપિ યઃ શિવઃ ।
રુદ્રાણામપિ યો રુદ્રઃ પ્રભા પ્રભવતામપિ ॥ ૨૮॥

યોગિનામપિ યો યોગી કારણાનાં ચ કારણમ્ ।
યતો લોકાઃ સમ્ભવન્તિ ન ભવન્તિ યતઃ પુનઃ ॥ ૨૯॥

સર્વભૂતાત્મભૂતસ્ય હરસ્યામિતતેજસઃ ।
અષ્ટોત્તરસહસ્રં તુ નામ્નાં શર્વસ્ય મે શ઼ૃણુ ।
યચ્છ્રુત્વા મનુજવ્યાઘ્ર સર્વાન્કામાનવાપ્સ્યસિ ॥ ૩૦॥

(અથ સહસ્રનામસ્તોત્રમ્ ।)
ૐ સ્થિરઃ સ્થાણુઃ પ્રભુર્ભીમઃ પ્રવરો વરદો વરઃ । (પ્રભુર્ભાનુઃ)
સર્વાત્મા સર્વવિખ્યાતઃ સર્વઃ સર્વકરો ભવઃ ॥ ૩૧॥

જટી ચર્મી શિખી ખડ્ગી સર્વાઙ્ગઃ સર્વભાવનઃ । (ચર્મી શિખણ્ડી ચ)
હરશ્ચ હરિણાક્ષશ્ચ સર્વભૂતહરઃ પ્રભુઃ ॥ ૩૨॥

પ્રવૃત્તિશ્ચ નિવૃત્તિશ્ચ નિયતઃ શાશ્વતો ધ્રુવઃ ।
શ્મશાનવાસી ભગવાન્ખચરો ગોચરોઽર્દનઃ ॥ ૩૩॥

અભિવાદ્યો મહાકર્મા તપસ્વી ભૂતભાવનઃ ।
ઉન્મત્તવેષપ્રચ્છન્નઃ સર્વલોકપ્રજાપતિઃ ॥ ૩૪॥

મહારૂપો મહાકાયો વૃષરૂપો મહાયશાઃ ।
મહાત્મા સર્વભૂતાત્મા વિશ્વરૂપો મહાહનુઃ ॥ ૩૫॥

લોકપાલોઽન્તર્હિતાત્મા પ્રસાદો હયગર્દભિઃ ।
પવિત્રં ચ મહાંશ્ચૈવ નિયમો નિયમાશ્રિતઃ ॥ ૩૬॥

સર્વકર્મા સ્વયમ્ભૂત આદિરાદિકરો નિધિઃ ।

સહસ્રાક્ષો વિશાલાક્ષઃ સોમો નક્ષત્રસાધકઃ ॥ ૩૭॥

ચન્દ્રઃ સૂર્યઃ શનિઃ કેતુર્ગ્રહો ગ્રહપતિર્વરઃ ।
અત્રિરત્ર્યાનમસ્કર્તા મૃગબાણાર્પણોઽનઘઃ ॥ ૩૮॥

મહાતપા ઘોરતપા અદીનો દીનસાધકઃ ।
સંવત્સરકરો મન્ત્રઃ પ્રમાણં પરમં તપઃ ॥ ૩૯॥

યોગી યોજ્યો મહાબીજો મહારેતા મહાબલઃ ।
સુવર્ણરેતાઃ સર્વજ્ઞઃ સુબીજો બીજવાહનઃ ॥ ૪૦॥

દશબાહુસ્ત્વનિમિષો નીલકણ્ઠ ઉમાપતિઃ ।
વિશ્વરૂપઃ સ્વયંશ્રેષ્ઠો બલવીરો બલો ગણઃ ॥ ૪૧॥ (બલવીરોઽબલો)

ગણકર્તા ગણપતિર્દિગ્વાસાઃ કામ એવ ચ ।
મન્ત્રવિત્પરમો મન્ત્રઃ સર્વભાવકરો હરઃ ॥ ૪૨॥

કમણ્ડલુધરો ધન્વી બાણહસ્તઃ કપાલવાન્ ।
અશની શતઘ્ની ખડ્ગી પટ્ટિશી ચાયુધી મહાન્ ॥ ૪૩॥

સ્રુવહસ્તઃ સુરૂપશ્ચ તેજસ્તેજસ્કરો નિધિઃ ।
ઉષ્ણીષી ચ સુવક્ત્રશ્ચ ઉદગ્રો વિનતસ્તથા ॥ ૪૪॥

દીર્ઘશ્ચ હરિકેશશ્ચ સુતીર્થઃ કૃષ્ણ એવ ચ ।
શ ૃગાલરૂપઃ સિદ્ધાર્થો મુણ્ડઃ સર્વશુભઙ્કરઃ ॥ ૪૫॥

અજશ્ચ બહુરૂપશ્ચ ગન્ધધારી કપર્દ્યપિ ।
ઊર્ધ્વરેતા ઊર્ધ્વલિઙ્ગ ઊર્ધ્વશાયી નભઃસ્થલઃ ॥ ૪૬॥

ત્રિજટી ચીરવાસાશ્ચ રુદ્રઃ સેનાપતિર્વિભુઃ ।
અહશ્ચરો નક્તઞ્ચરસ્તિગ્મમન્યુઃ સુવર્ચસઃ ॥ ૪૭॥

ગજહા દૈત્યહા કાલો લોકધાતા ગુણાકરઃ ।
સિંહશાર્દૂલરૂપશ્ચ આર્દ્રચર્મામ્બરાવૃતઃ ॥ ૪૮॥

કાલયોગી મહાનાદઃ સર્વકામશ્ચતુષ્પથઃ ।
નિશાચરઃ પ્રેતચારી ભૂતચારી મહેશ્વરઃ ॥ ૪૯॥

બહુભૂતો બહુધરઃ સ્વર્ભાનુરમિતો ગતિઃ ।
નૃત્યપ્રિયો નિત્યનર્તો નર્તકઃ સર્વલાલસઃ ॥ ૫૦॥

ઘોરો મહાતપાઃ પાશો નિત્યો ગિરિરુહો નભઃ ।
સહસ્રહસ્તો વિજયો વ્યવસાયો હ્યતન્દ્રિતઃ ॥ ૫૧॥

અધર્ષણો ધર્ષણાત્મા યજ્ઞહા કામનાશકઃ ।
દક્ષયાગાપહારી ચ સુસહો મધ્યમસ્તથા ॥ ૫૨॥

તેજોપહારી બલહા મુદિતોઽર્થોઽજિતોઽવરઃ । (મુદિતોઽર્થોઽજિતો વરઃ)
ગમ્ભીરઘોષા ગમ્ભીરો ગમ્ભીરબલવાહનઃ ॥ ૫૩॥

ન્યગ્રોધરૂપો ન્યગ્રોધો વૃક્ષપર્ણસ્થિતિર્વિભુઃ । (વૃક્ષકર્ણ)
સુતીક્ષ્ણદશનશ્ચૈવ મહાકાયો મહાનનઃ ॥ ૫૪॥

વિષ્વક્સેનો હરિર્યજ્ઞઃ સંયુગાપીડવાહનઃ ।
તીક્ષ્ણતાપશ્ચ હર્યશ્વઃ સહાયઃ કર્મકાલવિત્ ॥ ૫૫॥

વિષ્ણુપ્રસાદિતો યજ્ઞઃ સમુદ્રો વડવામુખઃ ।
હુતાશનસહાયશ્ચ પ્રશાન્તાત્મા હુતાશનઃ ॥ ૫૬॥

ઉગ્રતેજા મહાતેજા જન્યો વિજયકાલવિત્ ।
જ્યોતિષામયનં સિદ્ધિઃ સર્વવિગ્રહ એવ ચ ॥ ૫૭॥

શિખી મુણ્ડી જટી જ્વાલી મૂર્તિજો મૂર્ધગો બલી ।
વેણવી પણવી તાલી ખલી કાલકટઙ્કટઃ ॥ ૫૮॥

નક્ષત્રવિગ્રહમતિર્ગુણબુદ્ધિર્લયો ગમઃ । (લયોઽગમઃ)
પ્રજાપતિર્વિશ્વબાહુર્વિભાગઃ સર્વગોમુખઃ ॥ ૫૯॥ (સર્વગોઽમુખઃ)

વિમોચનઃ સુસરણો હિરણ્યકવચોદ્ભવઃ । (સુશરણો)
મેઢ્રજો બલચારી ચ મહીચારી સ્રુતસ્તથા ॥ ૬૦॥

સર્વતૂર્યનિનાદી ચ સર્વાતોદ્યપરિગ્રહઃ ।
વ્યાલરૂપો ગુહાવાસી ગુહો માલી તરઙ્ગવિત્ ॥ ૬૧॥

ત્રિદશસ્ત્રિકાલધૃક્કર્મસર્વબન્ધવિમોચનઃ ।
બન્ધનસ્ત્વસુરેન્દ્રાણાં યુધિ શત્રુવિનાશનઃ ॥ ૬૨॥

સાઙ્ખ્યપ્રસાદો દુર્વાસાઃ સર્વસાધુનિષેવિતઃ ।
પ્રસ્કન્દનો વિભાગજ્ઞો અતુલ્યો યજ્ઞભાગવિત્ ॥ ૬૩॥

સર્વવાસઃ સર્વચારી દુર્વાસા વાસવોઽમરઃ ।
હૈમો હેમકરો યજ્ઞઃ સર્વધારી ધરોત્તમઃ ॥ ૬૪॥

લોહિતાક્ષો મહાક્ષશ્ચ વિજયાક્ષો વિશારદઃ ।
સઙ્ગ્રહો નિગ્રહઃ કર્તા સર્પચીરનિવાસનઃ ॥ ૬૫॥

મુખ્યોઽમુખ્યશ્ચ દેહશ્ચ કાહલિઃ સર્વકામદઃ । (મુખ્યો મુખ્યશ્ચ)
સર્વકાસપ્રસાદશ્ચ સુબલો બલરૂપધૃત્ ॥ ૬૬॥

સર્વકામવરશ્ચૈવ સર્વદઃ સર્વતોમુખઃ ।
આકાશનિર્વિરૂપશ્ચ નિપાતી હ્યવશઃ ખગઃ ॥ ૬૭॥

રૌદ્રરૂપોંઽશુરાદિત્યો બહુરશ્મિઃ સુવર્ચસી ।
વસુવેગો મહાવેગો મનોવેગો નિશાચરઃ ॥ ૬૮॥

સર્વવાસી શ્રિયાવાસી ઉપદેશકરોઽકરઃ ।
મુનિરાત્મનિરાલોકઃ સમ્ભગ્નશ્ચ સહસ્રદઃ ॥ ૬૯॥

પક્ષી ચ પક્ષરૂપશ્ચ અતિદીપ્તો વિશામ્પતિઃ ।
ઉન્માદો મદનઃ કામો હ્યશ્વત્થોઽર્થકરો યશઃ ॥ ૭૦॥

વામદેવશ્ચ વામશ્ચ પ્રાગ્દક્ષિણશ્ચ વામનઃ ।
સિદ્ધયોગી મહર્ષિશ્ચ સિદ્ધાર્થઃ સિદ્ધસાધકઃ ॥ ૭૧॥

ભિક્ષુશ્ચ ભિક્ષુરૂપશ્ચ વિપણો મૃદુરવ્યયઃ ।
મહાસેનો વિશાખશ્ચ ષષ્ટિભાગો ગવામ્પતિઃ ॥ ૭૨॥

વજ્રહસ્તશ્ચ વિષ્કમ્ભી ચમૂસ્તમ્ભન એવ ચ ।
વૃત્તાવૃત્તકરસ્તાલો મધુર્મધુકલોચનઃ ॥ ૭૩॥

વાચસ્પત્યો વાજસનો નિત્યમાશ્રમપૂજિતઃ ।
બ્રહ્મચારી લોકચારી સર્વચારી વિચારવિત્ ॥ ૭૪॥

ઈશાન ઈશ્વરઃ કાલો નિશાચારી પિનાકવાન્ ।
નિમિત્તસ્થો નિમિત્તં ચ નન્દિર્નન્દિકરો હરિઃ ॥ ૭૫॥

નન્દીશ્વરશ્ચ નન્દી ચ નન્દનો નન્દિવર્ધનઃ ।
ભગહારી નિહન્તા ચ કાલો બ્રહ્મા પિતામહઃ ॥ ૭૬॥

ચતુર્મુખો મહાલિઙ્ગશ્ચારુલિઙ્ગસ્તથૈવ ચ ।
લિઙ્ગાધ્યક્ષઃ સુરાધ્યક્ષો યોગાધ્યક્ષો યુગાવહઃ ॥ ૭૭॥

બીજાધ્યક્ષો બીજકર્તા અવ્યાત્માઽનુગતો બલઃ ।

ઇતિહાસઃ સકલ્પશ્ચ ગૌતમોઽથ નિશાકરઃ ॥ ૭૮॥

દમ્ભો હ્યદમ્ભો વૈદમ્ભો વશ્યો વશકરઃ કલિઃ ।
લોકકર્તા પશુપતિર્મહાકર્તા હ્યનૌષધઃ ॥ ૭૯॥

અક્ષરં પરમં બ્રહ્મ બલવચ્છક્ર એવ ચ ।
નીતિર્હ્યનીતિઃ શુદ્ધાત્મા શુદ્ધો માન્યો ગતાગતઃ ॥ ૮૦॥

બહુપ્રસાદઃ સુસ્વપ્નો દર્પણોઽથ ત્વમિત્રજિત્ ।
વેદકારો મન્ત્રકારો વિદ્વાન્સમરમર્દનઃ ॥ ૮૧॥

મહામેઘનિવાસી ચ મહાઘોરો વશીકરઃ ।
અગ્નિર્જ્વાલો મહાજ્વાલો અતિધૂમ્રો હુતો હવિઃ ॥ ૮૨॥

વૃષણઃ શઙ્કરો નિત્યં વર્ચસ્વી ધૂમકેતનઃ । (નિત્યવર્ચસ્વી)
નીલસ્તથાઙ્ગલુબ્ધશ્ચ શોભનો નિરવગ્રહઃ ॥ ૮૩॥

સ્વસ્તિદઃ સ્વસ્તિભાવશ્ચ ભાગી ભાગકરો લઘુઃ ।
ઉત્સઙ્ગશ્ચ મહાઙ્ગશ્ચ મહાગર્ભપરાયણઃ ॥ ૮૪॥

કૃષ્ણવર્ણઃ સુવર્ણશ્ચ ઇન્દ્રિયં સર્વદેહિનામ્ ।
મહાપાદો મહાહસ્તો મહાકાયો મહાયશાઃ ॥ ૮૫॥

મહામૂર્ધા મહામાત્રો મહાનેત્રો નિશાલયઃ ।
મહાન્તકો મહાકર્ણો મહોષ્ઠશ્ચ મહાહનુઃ ॥ ૮૬॥

મહાનાસો મહાકમ્બુર્મહાગ્રીવઃ શ્મશાનભાક્ ।
મહાવક્ષા મહોરસ્કો હ્યન્તરાત્મા મૃગાલયઃ ॥ ૮૭॥

લમ્બનો લમ્બિતોષ્ઠશ્ચ મહામાયઃ પયોનિધિઃ ।
મહાદન્તો મહાદંષ્ટ્રો મહાજિહ્વો મહામુખઃ ॥ ૮૮॥

મહાનખો મહારોમા મહાકેશો મહાજટઃ ।
પ્રસન્નશ્ચ પ્રસાદશ્ચ પ્રત્યયો ગિરિસાધનઃ ॥ ૮૯॥

સ્નેહનોઽસ્નેહનશ્ચૈવ અજિતશ્ચ મહામુનિઃ ।
વૃક્ષાકારો વૃક્ષકેતુરનલો વાયુવાહનઃ ॥ ૯૦॥

ગણ્ડલી મેરુધામા ચ દેવાધિપતિરેવ ચ ।
અથર્વશીર્ષઃ સામાસ્ય ઋક્સહસ્રામિતેક્ષણઃ ॥ ૯૧॥

યજુઃપાદભુજો ગુહ્યઃ પ્રકાશો જઙ્ગમસ્તથા ।
અમોઘાર્થઃ પ્રસાદશ્ચ અભિગમ્યઃ સુદર્શનઃ ॥ ૯૨॥

ઉપકારઃ પ્રિયઃ સર્વઃ કનકઃ કાઞ્ચનચ્છવિઃ ।
નાભિર્નન્દિકરો ભાવઃ પુષ્કરસ્થપતિઃ સ્થિરઃ ॥ ૯૩॥

દ્વાદશસ્ત્રાસનશ્ચાદ્યો યજ્ઞો યજ્ઞસમાહિતઃ ।
નક્તં કલિશ્ચ કાલશ્ચ મકરઃ કાલપૂજિતઃ ॥ ૯૪॥

સગણો ગણકારશ્ચ ભૂતવાહનસારથિઃ ।
ભસ્મશયો ભસ્મગોપ્તા ભસ્મભૂતસ્તરુર્ગણઃ ॥ ૯૫॥

લોકપાલસ્તથા લોકો મહાત્મા સર્વપૂજિતઃ । (લોકપાલસ્તથાઽલોકો)
શુક્લસ્ત્રિશુક્લઃ સમ્પન્નઃ શુચિર્ભૂતનિષેવિતઃ ॥ ૯૬॥

આશ્રમસ્થઃ ક્રિયાવસ્થો વિશ્વકર્મમતિર્વરઃ ।
વિશાલશાખસ્તામ્રોષ્ઠો હ્યમ્બુજાલઃ સુનિશ્ચલઃ ॥ ૯૭॥

કપિલઃ કપિશઃ શુક્લ આયુશ્ચૈવ પરોઽપરઃ ।
ગન્ધર્વો હ્યદિતિસ્તાર્ક્ષ્યઃ સુવિજ્ઞેયઃ સુશારદઃ ॥ ૯૮॥

પરશ્વધાયુધો દેવ અનુકારી સુબાન્ધવઃ ।
તુમ્બવીણો મહાક્રોધ ઊર્ધ્વરેતા જલેશયઃ ॥ ૯૯॥

ઉગ્રો વંશકરો વંશો વંશનાદો હ્યનિન્દિતઃ ।
સર્વાઙ્ગરૂપો માયાવી સુહૃદો હ્યનિલોઽનલઃ ॥ ૧૦૦॥

બન્ધનો બન્ધકર્તા ચ સુબન્ધનવિમોચનઃ ।
સ યજ્ઞારિઃ સ કામારિર્મહાદંષ્ટ્રો મહાયુધઃ ॥ ૧૦૧॥

બહુધાનિન્દિતઃ શર્વઃ શઙ્કરઃ શઙ્કરોઽધનઃ । (શઙ્કરોઽનઘઃ)
અમરેશો મહાદેવો વિશ્વદેવઃ સુરારિહા ॥ ૧૦૨॥

અહિર્બુધ્ન્યોઽનિલાભશ્ચ ચેકિતાનો હવિસ્તથા ।
અજૈકપાચ્ચ કાપાલી ત્રિશઙ્કુરજિતઃ શિવઃ ॥ ૧૦૩॥

ધન્વન્તરિર્ધૂમકેતુઃ સ્કન્દો વૈશ્રવણસ્તથા ।
ધાતા શક્રશ્ચ વિષ્ણુશ્ચ મિત્રસ્ત્વષ્ટા ધ્રુવો ધરઃ ॥ ૧૦૪॥

પ્રભાવઃ સર્વગો વાયુરર્યમા સવિતા રવિઃ । (સર્વગોવાયુરર્યમા)
ઉષઙ્ગુશ્ચ વિધાતા ચ માન્ધાતા ભૂતભાવનઃ ॥ ૧૦૫॥

વિભુર્વર્ણવિભાવી ચ સર્વકામગુણાવહઃ ।
પદ્મનાભો મહાગર્ભશ્ચન્દ્રવક્ત્રોઽનિલોઽનલઃ ॥ ૧૦૬॥

બલવાંશ્ચોપશાન્તશ્ચ પુરાણઃ પુણ્યચઞ્ચુરી ।
કુરુકર્તા કુરુવાસી કુરુભૂતો ગુણૌષધઃ ॥ ૧૦૭॥

સર્વાશયો દર્ભચારી સર્વેષાં પ્રાણિનાં પતિઃ ।
દેવદેવઃ સુખાસક્તઃ સદસત્સર્વરત્નવિત્ ॥ ૧૦૮॥

કૈલાસગિરિવાસી ચ હિમવદ્ગિરિસંશ્રયઃ ।
કૂલહારી કૂલકર્તા બહુવિદ્યો બહુપ્રદઃ ॥ ૧૦૯॥

વણિજો વર્ધકી વૃક્ષો બકુલશ્ચન્દનશ્છદઃ ।
સારગ્રીવો મહાજત્રુરલોલશ્ચ મહૌષધઃ ॥ ૧૧૦॥

સિદ્ધાર્થકારી સિદ્ધાર્થશ્છન્દોવ્યાકરણોત્તરઃ ।
સિંહનાદઃ સિંહદંષ્ટ્રઃ સિંહગઃ સિંહવાહનઃ ॥ ૧૧૧॥

પ્રભાવાત્મા જગત્કાલસ્થાલો લોકહિતસ્તરુઃ ।
સારઙ્ગો નવચક્રાઙ્ગઃ કેતુમાલી સભાવનઃ ॥ ૧૧૨॥

ભૂતાલયો ભૂતપતિરહોરાત્રમનિન્દિતઃ ॥ ૧૧૩॥

વાહિતા સર્વભૂતાનાં નિલયશ્ચ વિભુર્ભવઃ ।
અમોઘઃ સંયતો હ્યશ્વો ભોજનઃ પ્રાણધારણઃ ॥ ૧૧૪॥ (પ્રાણધારકઃ)

ધૃતિમાન્મતિમાન્દક્ષઃ સત્કૃતશ્ચ યુગાધિપઃ ।
ગોપાલિર્ગોપતિર્ગ્રામો ગોચર્મવસનો હરિઃ। ૧૧૫॥

હિરણ્યબાહુશ્ચ તથા ગુહાપાલઃ પ્રવેશિનામ્ ।
પ્રકૃષ્ટારિર્મહાહર્ષો જિતકામો જિતેન્દ્રિયઃ ॥ ૧૧૬॥

ગાન્ધારશ્ચ સુવાસશ્ચ તપઃસક્તો રતિર્નરઃ ।
મહાગીતો મહાનૃત્યો હ્યપ્સરોગણસેવિતઃ ॥ ૧૧૭॥

મહાકેતુર્મહાધાતુર્નૈકસાનુચરશ્ચલઃ ।
આવેદનીય આદેશઃ સર્વગન્ધસુખાવહઃ ॥ ૧૧૮॥

તોરણસ્તારણો વાતઃ પરિધી પતિખેચરઃ ।
સંયોગો વર્ધનો વૃદ્ધો અતિવૃદ્ધો ગુણાધિકઃ ॥ ૧૧૯॥

નિત્ય આત્મસહાયશ્ચ દેવાસુરપતિઃ પતિઃ ।
યુક્તશ્ચ યુક્તબાહુશ્ચ દેવો દિવિ સુપર્વણઃ ॥ ૧૨૦॥

આષાઢશ્ચ સુષાણ્ઢશ્ચ ધ્રુવોઽથ હરિણો હરઃ ।
વપુરાવર્તમાનેભ્યો વસુશ્રેષ્ઠો મહાપથઃ ॥ ૧૨૧॥

શિરોહારી વિમર્શશ્ચ સર્વલક્ષણલક્ષિતઃ ।
અક્ષશ્ચ રથયોગી ચ સર્વયોગી મહાબલઃ ॥ ૧૨૨॥

સમામ્નાયોઽસમામ્નાયસ્તીર્થદેવો મહારથઃ ।
નિર્જીવો જીવનો મન્ત્રઃ શુભાક્ષો બહુકર્કશઃ ॥ ૧૨૩॥

રત્નપ્રભૂતો રત્નાઙ્ગો મહાર્ણવનિપાનવિત્ ।
મૂલં વિશાલો હ્યમૃતો વ્યક્તાવ્યક્તસ્તપોનિધિઃ ॥ ૧૨૪॥

આરોહણોઽધિરોહશ્ચ શીલધારી મહાયશાઃ ।
સેનાકલ્પો મહાકલ્પો યોગો યુગકરો હરિઃ ॥ ૧૨૫॥

યુગરૂપો મહારૂપો મહાનાગહનો વધઃ ।
ન્યાયનિર્વપણઃ પાદઃ પણ્ડિતો હ્યચલોપમઃ ॥ ૧૨૬॥

બહુમાલો મહામાલઃ શશી હરસુલોચનઃ ।
વિસ્તારો લવણઃ કૂપસ્ત્રિયુગઃ સફલોદયઃ ॥ ૧૨૭॥

ત્રિલોચનો વિષણ્ણાઙ્ગો મણિવિદ્ધો જટાધરઃ ।
બિન્દુર્વિસર્ગઃ સુમુખઃ શરઃ સર્વાયુધઃ સહઃ ॥ ૧૨૮॥

નિવેદનઃ સુખાજાતઃ સુગન્ધારો મહાધનુઃ ।
ગન્ધપાલી ચ ભગવાનુત્થાનઃ સર્વકર્મણામ્ ॥ ૧૨૯॥

મન્થાનો બહુલો વાયુઃ સકલઃ સર્વલોચનઃ ।
તલસ્તાલઃ કરસ્થાલી ઊર્ધ્વસંહનનો મહાન્ ॥ ૧૩૦॥

છત્રં સુચ્છત્રો વિખ્યાતો લોકઃ સર્વાશ્રયઃ ક્રમઃ ।
મુણ્ડો વિરૂપો વિકૃતો દણ્ડી કુણ્ડી વિકુર્વણઃ। ૧૩૧॥

હર્યક્ષઃ કકુભો વજ્રો શતજિહ્વઃ સહસ્રપાત્ ।
સહસ્રમૂર્ધા દેવેન્દ્રઃ સર્વદેવમયો ગુરુઃ ॥ ૧૩૨॥

સહસ્રબાહુઃ સર્વાઙ્ગઃ શરણ્યઃ સર્વલોકકૃત્ ।

પવિત્રં ત્રિકકુન્મન્ત્રઃ કનિષ્ઠઃ કૃષ્ણપિઙ્ગલઃ । ૧૩૩ ॥

બ્રહ્મદણ્ડવિનિર્માતા શતઘ્નીપાશશક્તિમાન્ ।
પદ્મગર્ભો મહાગર્ભો બ્રહ્મગર્ભો જલોદ્ભવઃ ॥ ૧૩૪ ॥

ગભસ્તિર્બ્રહ્મકૃદ્બ્રહ્મી બ્રહ્મવિદ્બ્રાહ્મણો ગતિઃ ।
અનન્તરૂપો નૈકાત્મા તિગ્મતેજાઃ સ્વયમ્ભુવઃ ॥ ૧૩૫ ॥

ઊર્ધ્વગાત્મા પશુપતિર્વાતરંહા મનોજવઃ ।
ચન્દની પદ્મનાલાગ્રઃ સુરભ્યુત્તરણો નરઃ ॥ ૧૩૬ ॥

કર્ણિકારમહાસ્રગ્વી નીલમૌલિઃ પિનાકધૃત્ ।
ઉમાપતિરુમાકાન્તો જાહ્નવીધૃગુમાધવઃ ॥ ૧૩૭ ॥

વરો વરાહો વરદો વરેણ્યઃ સુમહાસ્વનઃ ।
મહાપ્રસાદો દમનઃ શત્રુહા શ્વેતપિઙ્ગલઃ ॥ ૧૩૮ ॥

પીતાત્મા પરમાત્મા ચ પ્રયતાત્મા પ્રધાનધૃત્ ।
સર્વપાર્શ્વમુખસ્ત્ર્યક્ષો ધર્મસાધારણો વરઃ ॥ ૧૩૯ ॥

ચરાચરાત્મા સૂક્ષ્માત્મા અમૃતો ગોવૃષેશ્વરઃ ।
સાધ્યર્ષિર્વસુરાદિત્યો વિવસ્વાન્સવિતાઽમૃતઃ ૧૪૦ ॥

વ્યાસઃ સર્ગઃ સુસઙ્ક્ષેપો વિસ્તરઃ પર્યયો નરઃ ।
ઋતુ સંવત્સરો માસઃ પક્ષઃ સઙ્ખ્યાસમાપનઃ ॥ ૧૪૧ ॥

કલા કાષ્ઠા લવા માત્રા મુહૂર્તાહઃક્ષપાઃ ક્ષણાઃ ।
વિશ્વક્ષેત્રં પ્રજાબીજં લિઙ્ગમાદ્યસ્તુ નિર્ગમઃ ॥ ૧૪૨ ॥

સદસદ્વ્યક્તમવ્યક્તં પિતા માતા પિતામહઃ ।
સ્વર્ગદ્વારં પ્રજાદ્વારં મોક્ષદ્વારં ત્રિવિષ્ટપમ્ ॥ ૧૪૩ ॥

નિર્વાણં હ્લાદનશ્ચૈવ બ્રહ્મલોકઃ પરા ગતિઃ ।
દેવાસુરવિનિર્માતા દેવાસુરપરાયણઃ ॥ ૧૪૪ ॥

દેવાસુરગુરુર્દેવો દેવાસુરનમસ્કૃતઃ ।
દેવાસુરમહામાત્રો દેવાસુરગણાશ્રયઃ ॥ ૧૪૫ ॥

દેવાસુરગણાધ્યક્ષો દેવાસુરગણાગ્રણીઃ ।
દેવાતિદેવો દેવર્ષિર્દેવાસુરવરપ્રદઃ ॥ ૧૪૬ ॥

દેવાસુરેશ્વરો વિશ્વો દેવાસુરમહેશ્વરઃ ।
સર્વદેવમયોઽચિન્ત્યો દેવતાત્માઽઽત્મસમ્ભવઃ ॥ ૧૪૭॥

ઉદ્ભિત્ત્રિવિક્રમો વૈદ્યો વિરજો નીરજોઽમરઃ ॥

ઈડ્યો હસ્તીશ્વરો વ્યાઘ્રો દેવસિંહો નરર્ષભઃ ॥ ૧૪૮॥

વિબુધોઽગ્રવરઃ સૂક્ષ્મઃ સર્વદેવસ્તપોમયઃ ।
સુયુક્તઃ શોભનો વજ્રી પ્રાસાનાં પ્રભવોઽવ્યયઃ ॥ ૧૪૯॥

ગુહઃ કાન્તો નિજઃ સર્ગઃ પવિત્રં સર્વપાવનઃ ।
શૃઙ્ગી શૃઙ્ગપ્રિયો બભ્રૂ રાજરાજો નિરામયઃ ॥ ૧૫૦॥

અભિરામઃ સુરગણો વિરામઃ સર્વસાધનઃ ।
લલાટાક્ષો વિશ્વદેવો હરિણો બ્રહ્મવર્ચસઃ ॥ ૧૫૧॥

સ્થાવરાણાં પતિશ્ચૈવ નિયમેન્દ્રિયવર્ધનઃ ।
સિદ્ધાર્થઃ સિદ્ધભૂતાર્થોઽચિન્ત્યઃ સત્યવ્રતઃ શુચિઃ ॥ ૧૫૨॥

વ્રતાધિપઃ પરં બ્રહ્મ ભક્તાનાં પરમા ગતિઃ ।
વિમુક્તો મુક્તતેજાશ્ચ શ્રીમાન્શ્રીવર્ધનો જગત્ ॥ ૧૫૩॥

(ઇતિ સહસ્રનામસ્તોત્રમ્ । )

યથા પ્રધાનં ભગવાનિતિ ભક્ત્યા સ્તુતો મયા ।
યન્ન બ્રહ્માદયો દેવા વિદુસ્તત્ત્વેન નર્ષયઃ ।
સ્તોતવ્યમર્ચ્યં વન્દ્યં ચ કઃ સ્તોષ્યતિ જગત્પતિમ્ ॥ ૧૫૪॥

ભક્તિં ત્વેવં પુરસ્કૃત્ય મયા યજ્ઞપતિર્વિભુઃ ।
તતોઽભ્યનુજ્ઞાં સમ્પ્રાપ્ય સ્તુતો મતિમતાં વરઃ ॥ ૧૫૫॥

શિવમેભિઃ સ્તુવન્દેવં નામભિઃ પુષ્ટિવર્ધનૈઃ ।
નિત્યયુક્તઃ શુચિર્ભક્તઃ પ્રાપ્નોત્યાત્માનમાત્મના ॥ ૧૫૬॥

એતદ્ધિ પરમં બ્રહ્મ પરં બ્રહ્માધિગચ્છતિ ॥ ૧૫૭॥

ઋષયશ્ચૈવ દેવાશ્ચ સ્તુવન્ત્યેતેન તત્પરમ્ ॥ ૧૫૮॥

સ્તૂયમાનો મહાદેવસ્તુષ્યતે નિયતાત્મભિઃ ।
ભક્તાનુકમ્પી ભગવાનાત્મસંસ્થાકરો વિભુઃ ॥ ૧૫૯॥

તથૈવ ચ મનુષ્યેષુ યે મનુષ્યાઃ પ્રધાનતઃ ।

આસ્તિકાઃ શ્રદ્ધધાનાશ્ચ બહુભિર્જન્મભિઃ સ્તવૈઃ ॥ ૧૬૦॥

ભક્ત્યા હ્યનન્યમીશાનં પરં દેવં સનાતનમ્ ।
કર્મણા મનસા વાચા ભાવેનામિતતેજસઃ ॥ ૧૬૧॥

શયાના જાગ્રમાણાશ્ચ વ્રજન્નુપવિશંસ્તથા ।
ઉન્મિષન્નિમિષંશ્ચૈવ ચિન્તયન્તઃ પુનઃ પુનઃ ॥ ૧૬૨॥

શ ૃણ્વન્તઃ શ્રાવયન્તશ્ચ કથયન્તશ્ચ તે ભવમ્ ।
સ્તુવન્તઃ સ્તૂયમાનાશ્ચ તુષ્યન્તિ ચ રમન્તિ ચ ॥ ૧૬૩॥

જન્મકોટિસહસ્રેષુ નાનાસંસારયોનિષુ ।
જન્તોર્વિગતપાપસ્ય ભવે ભક્તિઃ પ્રજાયતે ॥ ૧૬૪॥

ઉત્પન્ના ચ ભવે ભક્તિરનન્યા સર્વભાવતઃ ।
ભાવિનઃ કારણે ચાસ્ય સર્વયુક્તસ્ય સર્વથા ॥ ૧૬૫॥

એતદ્દેવેષુ દુષ્પ્રાપં મનુષ્યેષુ ન લભ્યતે ।
નિર્વિઘ્ના નિશ્ચલા રુદ્રે ભક્તિરવ્યભિચારિણી ॥ ૧૬૬॥

તસ્યૈવ ચ પ્રસાદેન ભક્તિરુત્પદ્યતે નૃણામ્ ।
યેન યાન્તિ પરાં સિદ્ધિં તદ્ભાગવતચેતસઃ ॥ ૧૬૭॥ (યે ન)

યે સર્વભાવાનુગતાઃ પ્રપદ્યન્તે મહેશ્વરમ્ ।
પ્રપન્નવત્સલો દેવઃ સંસારાત્તાન્સમુદ્ધરેત્ ॥ ૧૬૮॥

એવમન્યે વિકુર્વન્તિ દેવાઃ સંસારમોચનમ્ ।
મનુષ્યાણામૃતે દેવં નાન્યા શક્તિસ્તપોબલમ્ ॥ ૧૬૯॥

ઇતિ તેનેન્દ્રકલ્પેન ભગવાન્સદસત્પતિઃ ।
કૃત્તિવાસાઃ સ્તુતઃ કૃષ્ણ તણ્ડિના શુભબુદ્ધિના ॥ ૧૭૦॥

સ્તવમેતં ભગવતો બ્રહ્મા સ્વયમધારયત્ ।
ગીયતે ચ સ બુદ્ધ્યેત બ્રહ્મા શઙ્કરસન્નિધૌ ॥ ૧૭૧॥

ઇદં પુણ્યં પવિત્રં ચ સર્વદા પાપનાશનમ્ ।
યોગદં મોક્ષદં ચૈવ સ્વર્ગદં તોષદં તથા ॥ ૧૭૨॥

એવમેતત્પઠન્તે ય એકભક્ત્યા તુ શઙ્કરમ્ ।
યા ગતિઃ સાઙ્ખ્યયોગાનાં વ્રજન્ત્યેતાં ગતિં તદા ॥ ૧૭૩॥

સ્તવમેતં પ્રયત્નેન સદા રુદ્રસ્ય સન્નિધૌ ।
અબ્દમેકં ચરેદ્ભક્તઃ પ્રાપ્નુયાદીપ્સિતં ફલમ્ ॥ ૧૭૪॥

એતદ્રહસ્યં પરમં બ્રહ્મણો હૃદિ સંસ્થિતમ્ ।
બ્રહ્મા પ્રોવાચ શક્રાય શક્રઃ પ્રોવાચ મૃત્યવે ॥ ૧૭૫॥

મૃત્યુઃ પ્રોવાચ રુદ્રેભ્યો રુદ્રેભ્યસ્તણ્ડિમાગમત્ ।
મહતા તપસા પ્રાપ્તસ્તણ્ડિના બ્રહ્મસદ્મનિ ॥ ૧૭૬॥

તણ્ડિઃ પ્રોવાચ શુક્રાય ગૌતમાય ચ ભાર્ગવઃ ।
વૈવસ્વતાય મનવે ગૌતમઃ પ્રાહ માધવ ॥ ૧૭૭॥

નારાયણાય સાધ્યાય સમાધિષ્ઠાય ધીમતે ।
યમાય પ્રાહ ભગવાન્સાધ્યો નારાયણોઽચ્યુતઃ ॥ ૧૭૮॥

નાચિકેતાય ભગવાનાહ વૈવસ્વતો યમઃ ।
માર્કણ્ડેયાય વાર્ષ્ણેય નાચિકેતોઽભ્યભાષત ॥ ૧૭૯॥

માર્કણ્ડેયાન્મયા પ્રાપ્તો નિયમેન જનાર્દન ।
તવાપ્યહમમિત્રઘ્ન સ્તવં દદ્યાં હ્યવિશ્રુતમ્ ॥ ૧૮૦॥

સ્વર્ગ્યમારોગ્યમાયુષ્યં ધન્યં વેદેન સંમિતમ્ ।
નાસ્ય વિઘ્નં વિકુર્વન્તિ દાનવા યક્ષરાક્ષસાઃ ॥ ૧૮૧॥

પિશાચા યાતુધાના વા ગુહ્યકા ભુજગા અપિ ।
યઃ પઠેત શુચિઃ પાર્થ બ્રહ્મચારી જિતેન્દ્રિયઃ ।
અભગ્નયોગો વર્ષં તુ સોઽશ્વમેધફલં લભેત્ ॥ ૧૮૨॥

ઇતિ શ્રીમન્મહાભારતે અનુશાસનપર્વણિ દાનધર્મપર્વણિ
અષ્ટચત્વારિંશોઽધ્યાયઃ ॥ ૪૮ ॥

શ્રીમહાદેવસહસ્રનામસ્તોત્રં સમાપ્તમ્ ।
શ્રીકૃષ્ણાર્પણમસ્તુ ।
શ્રીશિવાર્પણમસ્તુ ।

Proofread by Kirk Wortman kirkwort at hotmail.com, NA

See English translation in sacred-texts.com
https://www.sacred-texts.com/hin/m13/m13a017tm

*Shiva Sahasranama Stotram*

pdf was typeset on February 15, 2025

Please send corrections to *sanskrit@cheerful.com*